श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्ताधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्ताधिकशततमः सर्गः ॥

## श्रीरामरावणयोर्घोरं युद्धम्

ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा।
सुमहद् द्वैरथं युद्धं सर्वलोकभयावहम् ॥ **6.107.1** ॥

ततो राक्षससैन्यं च हरीणां च महद्बलम्।
प्रगृहीतप्रहरणं निश्चेष्टं समवर्तत ॥ **6.107.2** ॥

सम्प्रयुद्धौ तु तौ दृष्ट्वा बलवन्नरराक्षसौ।
व्याक्षिप्तहृदयाः सर्वे परं विस्मयमागताः ॥ **6.107.3** ॥

नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः।
तस्थुः प्रेक्ष्य च सङ्ग्रामं नाभिजग्मुः परस्परम् ॥ **6.107.4** ॥

रक्षसां रावणं चापि वानराणां च राघवम्।
पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ ॥ **6.107.5** ॥

तौ तु तत्र निमित्तानि दृष्ट्वा राघवरावणौ।
कृतबुद्धी स्थिरामर्षौ युयुधाते ह्यभीतवत् ॥ **6.107.6** ॥

जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः।
धृतौ स्ववीर्यसर्वस्वं युद्धेऽदर्शयतां तदा ॥ **6.107.7** ॥

ततः क्रोधाद् दशग्रीवः शरान् सन्धाय वीर्यवान्।
मुमोच ध्वजमुद्दिश्य राघवस्य रथे स्थितम्॥ **6.107.8** ॥

ते शरास्तमनासाद्य पुरन्दररथध्वजम्।
रथशक्तिं परामृश्य निपेतुर्धरणीतले॥ **6.107.9** ॥

ततो रामोऽपि सङ्क्रुद्धश्चापमाकृष्य वीर्यवान्।
कृतप्रतिकृतं कर्तुं मनसा सम्प्रचक्रमे॥ **6.107.10** ॥

रावणध्वजमुद्दिश्य मुमोच निशितं शरम्।
महासर्पमिवासह्यं ज्वलन्तं स्वेन तेजसा॥ **6.107.11** ॥

रामश्चिक्षेप तेजस्वी केतुमुद्दिश्य सायकम्।
जगाम स महीं छित्त्वा दशग्रीवध्वजं शरः॥ **6.107.12** ॥

स निकृत्तोऽपतद् भूमौ रावणस्यन्दनध्वजः।
ध्वजस्योन्मथनं दृष्ट्वा रावणः स महाबलः॥ **6.107.13** ॥

सम्प्रदीप्तोऽभवत् क्रोधादमर्षात् प्रदहन्निव।
स रोषवशमापन्नः शरवर्षं ववर्ष ह॥ **6.107.14** ॥

रामस्य तुरगान् दीप्तैः शरैर्विव्याध रावणः।
ते दिव्या हरयस्तत्र नास्खलन्नापि बभ्रमुः॥ **6.107.15** ॥

बभूवुः स्वस्थहृदयाः पद्मनालैरिवाहताः।
तेषामसम्भ्रमं दृष्ट्वा वाजिनां रावणस्तदा॥ **6.107.16** ॥

भूय एव सुसङ्क्रुद्धः शरवर्षं मुमोच ह।
गदाश्च परिघांश्चैव चक्राणि मुसलानि च॥ **6.107.17** ॥

गिरिशृङ्गाणि वृक्षांश्च तथा शूलपरश्वधान्।
मायाविहितमेतत् तु शस्त्रवर्षमपातयत्।
सहस्रशस्तदा बाणानश्रान्तहृदयोद्यमः॥ **6.107.18** ॥

तुमुलं त्रासजननं भीमं भीमप्रतिस्वनम्।
तद् वर्षमभवद् युद्धे नैकशस्त्रमयं महत्॥ **6.107.19** ॥

विमुच्य राघवरथं समन्ताद् वानरे बले।
सायकैरन्तरिक्षं च चकार सुनिरन्तरम्॥ **6.107.20** ॥

मुमोच च दशग्रीवो निःसङ्गेनान्तरात्मना।
व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे॥ **6.107.21** ॥

प्रहसन्निव काकुत्स्थः सन्दधे निशिताञ्छरान्।
स मुमोच ततो बाणाञ्छतशोऽथ सहस्रशः॥ **6.107.22** ॥

तान् दृष्ट्वा रावणश्चक्रे स्वशरैः खं निरन्तरम्।
ताभ्यां नियुक्तेन तदा शरवर्षेण भास्वता॥ **6.107.23** ॥

शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम्।
नानिमित्तोऽभवद् बाणो नानिर्भेत्ता न निष्फलः॥ **6.107.24** ॥

अन्योन्यमभिसंहत्य निपेतुर्धरणीतले।
तथा विसृजतोर्बाणान् रामरावणयोर्मृधे॥ **6.107.25** ॥

प्रायुध्येतामविच्छिन्नमस्यन्तौ सव्यदक्षिणम्।
चक्रतुश्च शरैर्घोरैर्निरुच्छ्वासमिवाम्बरम्॥ **6.107.26** ॥

रावणस्य हयान् रामो हयान् रामस्य रावणः।
जघ्नतुस्तौ तदान्योन्यं कृतानुकृतकारिणौ॥ **6.107.27** ॥

एवं तु तौ सुसङ्क्रुद्धौ चक्रतुर्युद्धमुत्तमम्।
मुहूर्तमभवद् युद्धं तुमुलं रोमहर्षणम्॥ **6.107.28** ॥

तौ तथा युध्यमानौ तु समरे रामरावणौ।
ददृशुः सर्वभूतानि विस्मितेनान्तरात्मना॥ **6.107.29** ॥

अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ।
परस्परमभिक्रुद्धौ परस्परमभिद्रुतौ॥ **6.107.30** ॥

परस्परवधे युक्तौ घोररूपौ बभूवतुः।
मण्डलानि च वीथीश्च गतप्रत्यागतानि च॥ **6.107.31** ॥

दर्शयन्तौ बहुविधां सूतौ सारथ्यजां गतिम्।
अर्दयन् रावणं रामो राघवं चापि रावणः॥ **6.107.32** ॥

गतिवेगं समापन्नौ प्रवर्तननिवर्तने।
क्षिपतोः शरजालानि तयोस्तौ स्यन्दनोत्तमौ॥ **6.107.33** ॥

चेरतुः संयुगमहीं सासारौ जलदाविव।
दर्शयित्वा तदा तौ तु गतिं बहुविधां रणे॥ **6.107.34** ॥

परस्परस्याभिमुखौ पुनरेव च तस्थतुः।
धुरं धुरेण रथयोर्वक्त्रं वक्त्रेण वाजिनाम्॥ **6.107.35** ॥

पताकाश्च पताकाभिः समीयुः स्थितयोस्तदा।
रावणस्य ततो रामो धनुर्मुक्तैः शितैः शरैः॥ **6.107.36** ॥

चतुर्भिश्चतुरो दीप्तान् हयान् प्रत्यपसर्पयत्।
स क्रोधवशमापन्नो हयानामपसर्पणे॥ **6.107.37** ॥

मुमोच निशितान् बाणान् राघवाय दशाननः।
सोऽतिविद्धो बलवता दशग्रीवेण राघवः॥ **6.107.38** ॥

जगाम न विकारं च न चापि व्यथितोऽभवत्।
चिक्षेप च पुनर्बाणान् वज्रसारसमस्वनान्॥ **6.107.39** ॥

सारथिं वज्रहस्तस्य समुद्दिश्य दशाननः।
मातलेस्तु महावेगाः शरीरे पतिताः शराः॥ **6.107.40** ॥

न सूक्ष्ममपि सम्मोहं व्यथां वा प्रददुर्युधि।
तया धर्षणया क्रुद्धो मातलेर्न तथाऽऽत्मनः॥ **6.107.41** ॥

चकार शरजालेन राघवो विमुखं रिपुम्।
विंशतिं त्रिंशतिं षष्टिं शतशोऽथ सहस्रशः॥ **6.107.42** ॥

मुमोच राघवो वीरः सायकान् स्यन्दने रिपोः।
रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः॥ **6.107.43** ॥

गदामुसलवर्षेण रामं प्रत्यर्दयद् रणे।
तत् प्रवृत्तं पुनर्युद्धं तुमुलं रोमहर्षणम्॥ **6.107.44** ॥

गदानां मुसलानां च परिघाणां च निःस्वनैः।
शराणां पुङ्खवातैश्च क्षुभिताः सप्त सागराः॥ **6.107.45** ॥

क्षुब्धानां सागराणां च पातालतलवासिनः।
व्यथिता दानवाः सर्वे पन्नगाश्च सहस्रशः॥ **6.107.46** ॥

चकम्पे मेदिनी कृत्स्ना सशैलवनकानना।
भास्करो निष्प्रभश्चासीन्न ववौ चापि मारुतः॥ **6.107.47** ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
चिन्तामापेदिरे सर्वे सकिन्नरमहोरगाः॥ **6.107.48** ॥

स्वस्ति गोब्राह्मणेभ्यस्तु लोकास्तिष्ठन्तु शाश्वताः।
जयतां राघवः सङ्ख्ये रावणं राक्षसेश्वरम्॥ **6.107.49** ॥

एवं जपन्तोऽपश्यंस्ते देवाः सर्षिगणास्तदा।
रामरावणयोर्युद्धं सुघोरं रोमहर्षणम्॥ **6.107.50** ॥

गन्धर्वाप्सरसां सङ्घा दृष्ट्वा युद्धमनूपमम्।
गगनं गगनाकारं सागरः सागरोपमः॥ **6.107.51** ॥

रामरावणयोर्युद्धं रामरावणयोरिव।
एवं ब्रुवन्तो ददृशुस्तद् युद्धं रामरावणम्॥ **6.107.52** ॥

ततः क्रोधान्महाबाहू रघूणां कीर्तिवर्धनः।
सन्धाय धनुषा रामः शरमाशीविषोपमम्॥ **6.107.53** ॥

रावणस्य शिरोऽच्छिन्दच्छ्रीमज्ज्वलितकुण्डलम्।
तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा॥ **6.107.54** ॥

तस्यैव सदृशं चान्यद् रावणस्योत्थितं शिरः।
तत् क्षिप्तं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा॥ **6.107.55** ॥

द्वितीयं रावणशिरश्छिन्नं संयति सायकैः।
छिन्नमात्रं च तच्छीर्षं पुनरेव प्रदृश्यते॥ **6.107.56** ॥

तदप्यशनिसङ्काशैश्छिन्नं रामस्य सायकैः।
एवमेव शतं छिन्नं शिरसां तुल्यवर्चसाम्॥ **6.107.57** ॥

न चैव रावणस्यान्तो दृश्यते जीवितक्षये।
ततः सर्वास्त्रविद् वीरः कौसल्यानन्दवर्धनः॥ **6.107.58** ॥

मार्गणैर्बहुभिर्युक्तश्चिन्तयामास राघवः।
मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः॥ **6.107.59** ॥

क्रौञ्चावटे विराधस्तु कबन्धो दण्डकावने।
यैः साला गिरयो भग्ना वाली च क्षुभितोऽम्बुधिः॥ **6.107.60** ॥

त इमे सायकाः सर्वे युद्धे प्रात्ययिका मम।
किं नु तत् कारणं येन रावणे मन्दतेजसः॥ **6.107.61** ॥

इति चिन्तापरश्चासीदप्रमत्तश्च संयुगे।
ववर्ष शरवर्षाणि राघवो रावणोरसि॥ **6.107.62** ॥

रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः।
गदामुसलवर्षेण रामं प्रत्यर्दयद् रणे॥ **6.107.63** ॥

तत् प्रवृत्तं महद् युद्धं तुमुलं रोमहर्षणम्।
अन्तरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि॥ **6.107.64** ॥

देवदानवयक्षाणां पिशाचोरगरक्षसाम्।
पश्यतां तन्महद् युद्धं सर्वरात्रमवर्तत॥ **6.107.65** ॥

नैव रात्रिं न दिवसं न मुहूर्तं न च क्षणम्।
रामरावणयोर्युद्धं विराममुपगच्छति॥ **6.107.66** ॥

दशरथसुतराक्षसेन्द्रयोस्तयो -
    र्जयमनवेक्ष्य रणे स राघवस्य।
सुरवररथसारथिर्महात्मा
    रणरतराममुवाच वाक्यमाशु॥ **6.107.67** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ताधिकशततमः सर्गः॥